॥ नारायणवर्म ॥

राजॊवाच

यया गुप्तः सहस्राक्षः सवाहान रिपुसैनिकान ।
क्रीडन्निव विनिर्जित्य त्रिलॊक्या बुभुजॆ श्रियम ॥ १ ॥

भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम ।
यथाऽततायिनः शत्रून यॆन गुप्तॊऽजयन्मृधॆ ॥ २ ॥

श्रीशुक उवाच

वृतः पुरॊहितस्त्वाष्ट्रॊ महॆंद्रायानुपृच्छतॆ ।
नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥

विश्वरूप उवाच

धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मुखः ।
कृतस्वांगकरन्यासॊ मंत्राभ्यां वाग्यतः शुचिः ॥ ४ ॥

नारायणमयं वर्म सन्नह्यॆद्भय आगतॆ ।

www.yousigma.com

दैवभूतात्मकर्मभ्यो नारायणमयः पुमान ॥ ५ ॥

पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ।
मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत ॥ ६ ॥

नमो नारायणायेति विपर्ययमथापि वा ।
करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ॥ ७ ॥

प्रणवादियकारांतमंगुल्यंगुष्ठपर्वसु ।
न्यसेद्धृदय ओंकारं विकारमनु मूर्धनि ॥ ८ ॥

षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत ।
वेकारं नेत्रयोर्युंज्यान्नकारं सर्वसंधिषु ॥ ९ ॥

मकारमस्त्रमुद्दिश्य मंत्रमूर्तिर्भवेद्बुधः ।
सविसर्गं फडंतं तु सर्वदिक्षु विनिर्दिशेत ॥ १० ॥

"ओं विष्णवे नमः"

इत्यात्मानं परं ध्यायेद्ध्येयं षट्शक्तिभिर्युतम ।
विद्यातेजस्तपोमूर्तिरिमं मंत्रमुदाहरेत ॥ ११ ॥

www.yousigma.com

हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे ।
दरारिचर्मासिगदेषुचापपाशान दधानोऽष्टगुणोऽष्टबाहुः ॥ १२ ॥

जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात ।
स्थले च मायावटुवामनोऽव्यात त्रिविक्रमः खेऽवतु विश्वरूपः ॥ १३ ॥

दुर्गेष्वटव्याजिमखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ।
विमुंचतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ १४ ॥

रक्षत्वसौ माऽध्वनि यज~झकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ।
रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजो माम ॥ १५ ॥

मामुग्रधन्वा निखिलप्रमादान्नारायणः पातु नरश्च हासात ।
दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः कर्मबंधात ॥ १६ ॥

सनत्कुमारोऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात ।
देवर्षिवर्यः पुरुषांतरार्चनात कूर्मो हरिर्मां निरयादशेषात ॥ १७ ॥

धन्वंतरिर्भगवान पात्वपथ्याद्द्वंद्वाद्भयादृषभो निर्जितात्मा ।

यज्ञश्च लोकादुत तत्कृतान्नो बलो गणात क्रोधवशादहींद्रः ॥ १८ ॥

द्वैपायनो भगवानप्रबोधादबुद्धस्तु पाखंडगणात प्रमादात ।
कल्की कलेः कालमलात प्रपातु धर्मावनायोरुकृतावतारः ॥ १९ ॥

मां केशवो गदया प्रातरव्याद्गोविंद आसंगव आत्तवेणुः ।
नारायणः पातु सदाऽऽत्तशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः ॥ २० ॥

देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामाऽवतु माधवो माम ।
दोषे हृषीकेश उतार्धरात्रे निशीथ ऐकोऽवतु पद्मनाभः ॥ २१ ॥

श्रीवत्सलक्ष्माऽपरराात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः ।
दामोदरोऽव्यादनुसंध्यं प्रभाते विष्णुः श्रीमान भगवान कालमूर्तिः ॥ २२ ॥

चक्रं युगांतानलतिग्मनेमि भ्रमत्समंताद्भगवत्प्रयुक्तम ।
दंदग्धि दंदग्ध्यरिसैन्यमाशु कक्षं यथा वायुसखो हुताशः ॥ २३ ॥

गदेऽशनिस्पर्शनविस्फुलिंगे निष्पिंढि निष्पिंढ्यजितप्रियाऽसि ।
कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन ॥ २४ ॥

www.yogsigma.com

त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन ।
दरेंद्र विद्रावय कृष्णपूरितो भीमस्वनोऽरीन हृदयानि कंपयन ॥ २५ ॥

त्वं तिग्मधाराऽसि वरारिसैन्यमीशप्रयुक्तो मम छिंदि छिंदि ।
चक्षूंषि चर्मन शतचंद्र छादय द्विषामघं नो हर पापचक्षुषाम ॥ २६ ॥

यन्नो भयं ग्रहेभ्योऽभूत केतुभ्यो नृभ्य एव च ।
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योऽघेभ्य एव च ॥ २७ ॥

सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात ।
प्रयांतु संक्षयं सद्यो येऽन्ये श्रेयःप्रतीपकाः ॥ २८ ॥

गरुडो भगवान स्तोत्रस्तोमच्छंदोमयः प्रभुः ।
रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥ २९ ॥

सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः ।
बुद्धींद्रियमनःप्राणान पांतु षार्षदभूषणाः ॥ ३० ॥

यथा हि भगवानेव वस्तुतः सदसच्च यत ।
सत्येन तेन नः सर्वे यांतु नाशमुपद्रवाः ॥ ३१ ॥

यथैकात्म्यानुभावॆन विकल्परहितः स्वयम ।
भूषणायुधलिंगाख्या धत्तॆ शक्तीः स्वमायया ॥ ३२ ॥

तॆनैव सत्यमानॆन सर्वज्ञॊ भगवान हरिः ।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३३ ॥

विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भगवान नारसिंहः ।
प्रहापयन लॊकभयं स्वनॆन स्वतॆजसा ग्रस्तसमस्ततॆजाः ॥ ३४ ॥

मघवन्निदमाख्यातं वर्म नारायणात्मकम ।
विजॆष्यस्यंजसा यॆन दंशितॊऽसुरयूथपान ॥ ३५ ॥

ऎतद्धारयमाणस्तु यं यं पश्यति चक्षुषा ।
पदा वा संस्पृशॆत सद्‌यः साध्वसात स विमुच्यतॆ ॥ ३६ ॥

न कुतश्चिद्भयं तस्य विद्‌यां धारयतॊ भवॆत ।
राजदस्युग्रहादिभ्यॊ व्याध्यादिभ्यश्च कर्हिचित ॥ ३७ ॥

इमां विद्‌यां पुरा कश्चित कौशिकॊ धारयन द्‌विजः ।
यॊगधारणया स्वांगं जहौ स मरुधन्वनि ॥ ३८ ॥

www.yousigma.com

तस्योपरि विमानेन गंधर्वपतिरेकदा ।
ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ३९ ॥

सांगनो न्यपतत सद्यः सविमानो ह्यवाक्शिराः ।
विद्यामिमां धारयतो मृतस्यास्थिविलंघनात ॥ ४० ॥

स वालखिल्यवचनादस्थीन्यादाय विस्मितः ।
प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात ॥ ४१ ॥

य इदं शृणुयात काले यो धारयति चादृतः ।
तं नमस्यंति भूतानि मुच्यते सर्वतो भयात ॥ ४२ ॥

श्रीशुक उवाच

एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ।
त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान ॥ ४३ ॥

॥ इति श्रीमद्भागवते षष्ठस्कंधे नारायणवर्मोपदेशः ॥

www.yousigma.com